संस्कृतवार्ताः

17.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य आन्ध्रप्रदेशस्य पलनाडुमण्डलस्य चिलाकलुरिपेटानगरे सभायां भागग्रहणं करिष्यति ।

· विदेशमन्त्री डॉ. सुब्रह्मण्यमजयशंकरः उक्तवान् यत् भारतम् स्वनिर्माणक्षेत्रे अधिकं ध्यानं दद्यात् चीनदेशा पेच्छया सह स्पर्धां कर्तुं ।

· प्रवर्तन निदेशालय: दिल्ली जलबोर्ड प्रकरणे दिल्ल्या: मुख्यमन्त्रिणम् अरविन्द केजरीवाल 'समन' इति प्रसार्य श्व: परिपृच्छायै आहूतवान्।

· भारतीय: क्रीडक: गुलवीर-सिंह: कैलिफॉर्निया इत्यत्र दश सहस्र मीटर-धावन-स्पर्धायां द्वितीयं स्थानं प्राप्तवान्।

· महिला-प्रीमियर लीग क्रिकेट् क्रीडाया: अन्तिमं-क्रीडा स्पर्धा अद्य रॉयल-चैलेंजर्स बैंग्लोर दलस्य दिल्ली कैपिलटल्सं दलस्य च मध्ये ।

<u>प्रधानमन्त्री नरेन्द्रमोदी</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य आन्ध्रप्रदेशस्य पलनाडुमण्डलस्य चिलाकलुरिपेटानगरे सभायां भागग्रहणं करिष्यति। सः अद्य राष्ट्रियलोकतांत्रिकगठबन्धनस्य – एनडीए – भारतीयजनतापक्षस्य, तेलुगुदेशपक्षस्य, जनसेनापक्षस्य च घटकदलानां प्रतिनिधीनां सभायां अपि सम्मिलितः भविष्यति। लोकसभानिर्वाचनमतिरिच्य आन्ध्रप्रदेशे अपि राज्यविधानसभानिर्वाचनं भविष्यति। तेलुगुदेशदलम् पञ्चवर्षानन्तरं अद्यावधौ पुनः एनडीए-पक्षे सम्मिलितम् जातम्।

## डॉ. जयशंकरः

विदेशमन्त्री डॉ. सुब्रह्मण्यमजयशंकरः उक्तवान् यत् भारतेन चीनदेशेन सह स्पर्धां कर्तुं स्वनिर्माणक्षेत्रे अधिकं ध्यानं दातव्यम्। एकस्य वार्ताहरसमूहस्य सम्मेलने सः अवदत् यत् चीनदेशेन सह न केवलं सीमविषयाः सन्ति, अपितु बहवः आर्थिकविषयाः अपि सन्ति। डॉ.जयशंकरः अवदत् यत् चीनस्य प्रतीकारः केवलं सशक्त-अर्थव्यवस्थायाः कृते एव कर्तुं शक्यते। सः अवदत् यत् भारतेन केवलं गतदशके एव स्वस्य निर्माणक्षेत्रे ध्यानं प्रदत्तमस्ति।

## प्रवर्तन निदेशालय

प्रवर्तन निदेशालय: 'दिल्ली-जल-बोर्ड' इत्यत्र अनियमितता-सम्बद्धे धनशोधन प्रकरणे दिल्ल्या: मुख्यमन्त्रिणम् अरविन्द केजरीवालं 'समन' इति प्रसार्य श्व: परिपृच्छायै आहूतवान्। श्रीकेजरीवालं धनशोधन-निवारण-अधिनियमस्य अन्तर्गतं वक्तव्यं पञ्जीकर्तुं उक्तवान्। इदं द्वितीयं प्रकरणम् अस्ति यदा केजरीवालं धनशोधन-प्रकरणे समन् इति प्रसारितम्। निदेशालयेन अष्टवारं आबकारी-नीति-सम्बद्ध-प्रकरणे परिपृच्छायै समन् इति प्रसारितम्। नवमं वारं प्रसार्य मार्च-मासस्य एकविंशतितमे दिनाङ्के प्रस्तोतुम उक्तम्।

## भारतीयसेनायाः

भारतीयसेनायाः एकं दलं सैन्याभ्यासार्थं सेशेल्स्-नगरं प्रति प्रस्थितः अस्ति। अयं अभ्यासः मार्चमासस्य अष्टादश दिनाङ्कात् मार्चमासस्य सप्तविंशतिः दिनाङ्कपर्यन्तं प्रचलिष्यति। एकाधिकद्विसहस्रतमवर्षात् आरभ्य प्रतिद्वितीयवर्षे द्वयोः देशयोः मध्ये संयुक्तसैन्याभ्यासस्य आयोजनं भवति। अस्मिन् वर्षे भारतपक्षतः गोरखा राइफल्स् इति सैन्यसमूहात् पञ्चचत्वारिंशत् सैनिकाः भागं गृह्णन्ति। रक्षामन्त्रालयानुसारं अस्य अभ्यासस्य उद्देश्यं शान्तिरक्षण अभियानाय समन्वयेन सह कार्यं कुर्वन्त् कर्म-कर्तार: च कौशलेषु निपुणतां प्राप्नुयुः। एतदतिरिच्य अयं अभ्यासः द्वयोः देशयोः सैन्यसम्बन्धान् अपि सुदृढं करिष्यति सममेव उभयोः देशयोः सेनाः परस्परं उत्तमकार्यशैल्याः अनुभवं प्राप्तुं समर्थाः भविष्यन्ति। अभ्यासे परिनगरीयवातावरणे दुष्करघटनानां निवारणार्थं कौशलस्य विषये विशेषम् अवधानं भविष्यति।

लोकसभानिर्वाचनस्य

चतुर्षु राज्येषु लोकसभानिर्वाचनस्य विधानसभानिर्वाचनस्य च घोषणायाः अनन्तरं निर्वाचनायोगेन आदर्शाचारसंहितायां प्रावधानानाम् प्रभावीरूपेण कार्यान्वयनार्थं निर्देशाः प्रदत्ताः। सर्वेषां राज्यानां मन्त्रिमण्डलसचिवं, मुख्यसचिवानां, मुख्यनिर्वाचनपदाधिकारिणां च कृते लिखितपत्रे आयोगेन उक्तं यत् कोषस्य व्ययेन सर्वकारस्य उपलब्धीनां प्रकाशनं इलेक्ट्रॉनिक-मुद्रित-माध्यमेषु कोऽपि विज्ञप्तिं न प्रख्यापयिष्यति। तत्र उक्तं यत्, निर्वाचनघोषणायां तत्क्षणमेव सर्वकारस्य उपलब्धीनां प्रदर्शनं यत्किमपि विज्ञापनं आहर्तुं वा स्थगनं कर्तुं मुख्यनिर्वाचनपदाधिकारिण: जिलानिर्वाचनपदाधिकारिण: च तात्कालिकं क्रियान्वयनं कर्तुं शक्नुवन्ति। सीईओ इत्यनेन राज्यविभागस्य अन्तर्जालीयपटलमाध्यमेन कस्यापि राजनैतिकपदाधिकारिणः छायाचित्रं अपाकर्तुं वा गोपनार्थं तात्कालिकं क्रियान्वयनं कर्तुं शक्यते। आयोगेन उक्तं यत्, निर्वाचनराज्यानां अन्तर्जालीयपटले, आह्वानकेन्द्रे च परिवेदनानिवारणतन्त्रं अपि भविष्यति। काल सेंटर अर्थात् जनसूचनाकेन्द्रे जनेभ्यः सहाय्यतार्थं निःशुल्क-सङ्ख्या अस्ति – एकं-नव-पञ्च-शून्यम्।

आइसलैण्ड

आइसलैण्ड देशस्य रेजेंस-प्रायद्वीपे ज्वालामुखि-विस्फोटानन्तरं दक्षिणीय- आइसलैण्ड-इत्यत्र घोषणा कृता। गत दिसम्बर-मासात् चतुर्थं वारं प्रायद्वीपे ज्वालामुखी-विस्फोटोऽभवत्। विस्फोटे अधिक-मात्रायां धूम, अग्निशेषा: वितरिता:। इमं पश्यन् अत्रत्येन लोकप्रिय-स्थलेन ब्लू-लैगून इत्यनेन सह निकटवर्तिनि क्षेत्राणि रिक्तानि कारितानि।

निर्वाचन आयोगेन आन्ध्रपद्रेश

निर्वाचन आयोगेन सर्वोच्च न्यायालयस्य वैधसंकल्पनायाप्रपत्रेण प्राप्तं अन्तर्जालीय सूचना-प्रपत्रम् अद्य निज अन्तर्जालीय तन्त्रांशे स्थापितमस्ति। एतत् सूचनात्मकं प्रपत्रम् निर्वाचन आयोगस्य अन्तर्जालीयपटले www.eci.gov.in/candidate- politicalparty इति तन्त्रांशे द्रष्टुं शक्यन्ते। निर्वाचन आयोगेन प्रोक्तं यत् सर्वोच्च न्यायालयस्य निर्देशानुसारं राजनैतिक दलानां निर्वाचनसम्बद्धसूचनाप्रपत्रम् गुप्तमाध्यमेन प्रत्यावर्तितमस्ति।

## मौसम

ऋतुविज्ञानविभागानुसारम् अद्य पश्चिमबङ्गस्य गङ्गाक्षेत्रेषु ओलावृष्टिः, वज्रपातः च सम्भाव्यते। अस्मिन् क्षेत्रे आगामिचतुर्दिनानि यावत् वज्रविद्युत्प्रचण्डवायुना सह वर्षा सम्भवति। झारखण्ड, ओडिशा, विदर्भ, छत्तीसगढ़, पूर्वमध्यप्रदेशे इत्यादिषु क्षेत्रेषु अपि मार्चमासस्य विंशतिः दिनांक पर्यन्तं गर्जना, विद्युत्, प्रचण्डवायुना च सह वृष्टिः भवितुं शक्नोति।

## महिला-प्रीमियर लीग

महिला-प्रीमियर लीग क्रिकेट् क्रीडायाः अन्तिमं-क्रीडा स्पर्धा अद्य रॉयल-चैलेंजर्स बैंग्लोर दलस्य दिल्ली कैपिलटल्सं दलस्य च मध्ये क्रीडिष्यते। स्पर्धैषा सायं सार्ध-सप्त-वादने नवदिल्ल्याः अरूण-जेटली-प्रांगणे भविष्यति।

## भारतीयः क्रीडकः

क्रीडकः गुलवीर-सिंहः कैलिफॉर्निया इत्यत्र-सैन-जुआन कैपिस्ट्रानो इत्यत्र पुरुषाणां दश सहस्र मीटर-धावन-स्पर्धायां द्वितीयं स्थानं प्राप्तवान्। सः इमं धावनं सप्तविंशति निमेषोत्तर एकचत्वारिंशत् दशमलव अष्ट-एक-क्षणे-पूर्णं कृतम्।

।। इति वार्ताः ।।